TECHE
UDINE

MANOSCRITTI

FONDO PRINCIPALE

Manoscritto n. **P_MSS_4317**

Nel Fondo Principale sono confluiti la maggior parte dei lasciti manoscritti pervenuti alla Biblioteca Civica «Vincenzo Joppi» nel corso del tempo: si tratta perciò di un fondo composito nel quale è possibile trovare manoscritti di argomento liturgico, scientifico, giuridico, botanico e altro.

Collocazione:

Biblioteca Civica "Vincenzo Joppi", Udine
https://www.techeudine.it/fondo-principale
https://www.sbhu.it/

॥६०॥ श्रीश्री[illegible]गुरुभ्यो नमः ॥ भक्तामरप्रणतमौलिमणिप्रभाणा । मुद्योतकं दलितपापतमोविता
नं । सम्यक्प्रणम्य जिनपादयुगं युगादा । वालंबनं भवजले पततां जनानां ॥१॥ यः संस्तुतः सकलवाङ्मयतत्वबो
धा । दुद्भूतबुद्धिपटुभिः सुरलोकनाथैः ॥ स्तोत्रैर्जगत्त्रितयचित्तहरैरुदारैः । स्तोष्ये किलाहमपि तं प्रथमं जिनेंद्रं ॥२॥
बुद्ध्या विनापि विबुधार्चितपादपीठ । स्तोतुं समुद्यतमतिर्विगतत्रपोहं । बालं विहाय जलसंस्थितमिंदुबिंब । मन्यः क
इच्छति जनः सहसा ग्रहीतुं ॥३॥ वक्तुं गुणान् गुणसमुद्र शशांककांतान् । कस्ते क्षमः सुरगुरुप्रतिमोपि बुद्ध्या । कल्पांत
कालपवनोद्धतनक्रचक्रं । को वा तरीतुमलमंबुनिधिं भुजाभ्यां ॥४॥ सोहं तथापि तव भक्तिवशान्मुनीश । कर्तुं
स्तवं विगतशक्तिरपि प्रवृत्तः । प्रीत्यात्मवीर्यमविचार्य मृगो मृगेंद्रं । नाभ्येति किं निजशिशोः परिपालनार्थं ॥५॥
अल्पश्रुतं श्रुतवतां परिहासधाम । त्वद्भक्तिरेव मुखरीकुरुते बलान्मां । यत्कोकिलः किल मधौ मधुरं विरौ
ति । तच्चाम्रचारुकलिकानिकरैकहेतु ॥६॥ त्वत्संस्तवेन भवसंततिसंनिबद्धं । पापं क्षणात्क्षयमुपैति शरीर
भाजां । आक्रांतलोकमलिनीलमशेषमाशु । सूर्यांशुभिन्नमिव शार्वरमंधकारं ॥७॥ मत्वेति नाथ तव संस्तवनं मयेद
मारभ्यते तनुधियापि तव प्रभावात् । चेतो हरिष्यति सतां नलिनीदलेषु । मुक्ताफलद्युतिमुपैति ननूदबिंदुः ॥८॥ आ 1
स्तां तव स्तवनमस्तसमस्तदोषं । त्वत्संकथापि जगतां दुरितानि हंति । दूरे सहस्रकिरणः कुरुते प्रभैव । पद्माकरेषु
जलजानि विकाशभांजि ॥९॥ नात्यद्भुतं भुवनभूषण भूतनाथ । भूतैर्गुणैर्भुवि भवंतमभिष्टुवंतः । तुल्या भवंति भव

तो ननु तेन किं वा भूत्याश्रितं य इह नात्मसमं करोति॥१०॥ दृष्ट्वा भवंतमनिमेषविलोकनीयं। नान्यत्र तोषमुपयाति ज
नस्य चक्षुः। पीत्वा पयः शशिकरद्युति दुग्धसिंधोः। क्षारं जलं जलनिधेरसितुं क इच्छेत्॥११॥ यैः शांतरागरुचिभिः परमाणुभि
स्त्वं। निर्मापितस्त्रिभुवनैकललामभूतः। तावंत एव खलु तेप्यणवः पृथिव्यां। यत्ते समानमपरं न हि रूपमस्ति॥१२॥ वक्त्रं क्व ते
सुरनरोरगनेत्रहारी। निःशेषनिर्जितजगत्त्रितयोपमानं। बिंबं कलंकमलिनं क्व निशाकरस्य। यद्वासरे भवति पांडुपला
शकल्पं। शुभ्रा गुणास्त्रिभुवनं तव लंघयंति। ये संश्रितास्त्रिजगदीश्वरनाथमेकं। कस्तान्निवारयति संचरतो यथेष्टं॥१
४॥ चित्रं किमत्र यदि ते त्रिदशांगनाभिः। नीतं मनागपि मनो न विकारमार्गं। कल्पांतकालमरुता चलिताचलेन
किं मंदराद्रिशिखरं चलितं कदाचित्॥१५॥ निर्धूमवर्त्तिरपवर्जिततैलपूरः। कृत्स्नं जगत्त्रयमिदं प्रकटीकरोषि
गम्यो न जातु मरुतां चलिताचलानां। दीपोऽपरस्त्वमसि नाथ जगत्प्रकाशः॥१६॥ नास्तं कदाचिदुपयासि न राहु
गम्यः। स्पष्टीकरोषि सहसा युगपज्जगंति। नांभोधरोदरनिरुद्धमहाप्रभावः। सूर्यातिशायिमहिमासि मुनींद्र लो
के॥१७॥ नित्योदयं दलितमोहमहांधकारं। गम्यं न राहुवदनस्य न वारिदानां। विभ्राजते तव मुखाब्जमनल्पकांति
विद्योतयज्जगदपूर्वशशांकबिंबं॥१८॥ किं शर्वरीषु शशिनाह्नि विवस्वता वा। युष्मन्मुखेंदुदलितेषु तमस्सु
नाथ। निष्पन्नशालिवनशालिनि जीवलोके। कार्यं कियज्जलधरैर्जलभारनम्रैः॥१९॥ ज्ञानं यथा त्वयि विभाति
कृतावकाशं। नैवं तथा हरिहरादिषु नायकेषु। तेजः स्फुरन्मणिषु याति यथा महत्त्वं। नैवं तु काचशकले कि 2

रणाकुलेपि।२०।मन्ये वरं हरिहरादय एव दृष्टा।दृष्टेषु येषु हृदयं त्वयि तोषमेति।किं वीक्षितेन भवता भुवि येन ना
न्यः।कश्चिन्मनो हरति नाथ भवांतरेपि।२१।स्त्रीणां शतानि शतशो जनयंति पुत्रान्।नान्या सुतं त्वदुपमं जननी प्रसूता।
सर्वादिशो दधति भानि सहस्ररश्मिं।प्राच्येव दिग्जनयति स्फुरदंशुजालं।२२।त्वामामनंति मुनयः परमं पुमांसम्।मादि
त्यवर्णममलं तमसः परस्तात्।त्वामेव सम्यगुपलभ्य जयंति मृत्युं।नान्यः शिवः शिवपदस्य मुनींद्र पंथा।२३।त्वामव्ययं
विभुमचिंत्यमसंख्यमाद्यं।ब्रह्माणमीश्वरमनंतमनंगकेतुं।योगीश्वरं विदितयोगमनेकमेकं।ज्ञानस्वरूपममलं प्र
वदंति संतः।२४।बुद्धस्त्वमेव विबुधार्चितबुद्धिबोधात्।त्वं शंकरोसि भुवनत्रयशंकरत्वात्।धातासि धीर शिवमार्गवि
धेर्विधानात्।व्यक्तं त्वमेव भगवन्पुरुषोत्तमोसि।२५।तुभ्यं नमस्त्रिभुवनार्तिहराय नाथ।तुभ्यं नमः क्षितितलाम
लभूषणाय।तुभ्यं नमस्त्रिजगतः परमेश्वराय।तुभ्यं नमो जिन भवोदधिशोषणाय।२६।को विस्मयोत्र यदि नाम
गुणैरशेषैः।त्वं संश्रितो निरवकाशतया मुनीश।दोषैरुपात्तविविधाश्रयजातगर्वैः।स्वप्नांतरेपि न कदाचिदपी
क्षितोसि।२७।उच्चैरशोकतरुसंश्रितमुन्मयूख।माभाति रूपममलं भवतो नितांतं।स्पष्टोल्लसत्किरणमस्ततमोविता
नं बिंबं रवेरिव पयोधरपार्श्ववर्त्ति २८ सिंहासने मणिमयूखशिखाविचित्रे।विभ्राजते तव वपुः कनकावदातं।बिंबं विय
द्विलसदंशुलतावितानं तुंगोदयाद्रिशिरसीव सहस्ररश्मिं २९ कुंदावदातचलचामरचारुशोभं।विभ्राजते तव
वपुः कलधौतकांतं उद्यच्छशांकशुचिनिर्झरवारिधार उच्चैस्तटं सुरगिरेरिव शातकौंभं ३० छत्रत्रयं तव विभाति २

शशांककांत।मुच्चैः स्थितं स्थगितभानुकरप्रतापं।मुक्ताफलप्रकरजालविवृद्धशोभं।प्रख्यापयत्त्रिजगतः परमेश्वरत्वं
।३१।उन्निद्रहेमनवपंकजपुंजकांति।पर्युल्लसन्नखमयूखशिखाभिरामौ।पादौ पदानि तव यत्र जिनेंद्र धत्तः।पद्मानि त
त्र विबुधाः परिकल्पयंति ३२।इत्थं यथा तव विभूतिरभूज्जिनेंद्र।धर्मोपदेशनविधौ न तथा परस्य।यादृक्प्रभा
दिनकृतः प्रहतांधकारा।तादृक्कुतो ग्रहगणस्य विकाशिनोपि।३३।श्च्योतन्मदाविलविलोलकपोलमूल।मत्तभ्र
मद्भ्रमरनादविवृद्धकोपं।ऐरावताभमिभमुद्धतमापतंतं।दृष्ट्वा भयं भवति नो भवदाश्रितानां।३४।भिन्नेभकुं
भगलदुज्ज्वलशोणिताक्त।मुक्ताफलप्रकरभूषितभूमिभागः।बद्धक्रमः क्रमगतं हरिणाधिपोपि।नाक्रा
मति क्रमयुगाचलसंश्रितं ते।३५।कल्पांतकालपवनोद्धतवह्निकल्पं।दावानलं ज्वलितमुज्ज्वलमु
त्स्फुलिंगं।विश्वं जिघत्सुमिव संमुखमापतंतं।त्वन्नामकीर्तनजलं शमयत्यशेषं।३६।रक्तेक्षणं समदकोकि
लकंठनीलं।क्रोधोद्धतं फणिनमुत्फणमापतंतं।आक्रामति क्रमयुगेन निरस्तशंकः।त्वन्नामनागदमनी हृ
दि यस्य पुंसः।३७।वल्गत्तुरंगगजगर्जितभीमनाद।माजौ बलं बलवतामपि भूपतीनां।उद्यद्दिवाकरमयूखशिखापवि
द्धं।त्वत्कीर्तनात्तम इवाशु भिदामुपैति।३८।कुंताग्रभिन्नगजशोणितवारिवाह।वेगावतारतरणातुरयोधभी
मे।युद्धे जयं विजितदुर्जयजेयपक्षाः।त्वत्पादपंकजवनाश्रयिणो लभंते।३९।अंभोनिधौ क्षुभितभीषणनक्रच
क्र।पाठीनपीठभयदोल्बणवाडवाग्नौ।रंगत्तरंगशिखरस्थितयानपात्रा।त्रासं विहाय भवतः स्मरणाद्व्रजंति।४० 3

उद्भूतभीषणजलोदरभारभुग्ना। शोच्यांदिशामुपगताः श्च्युतजीविताशाः। त्वत्पादपंकजरजोमृतदिग्धदेहा॥ म
र्त्या भवंति मकरध्वजतुल्यरूपाः॥४१॥ आपादकंठमुरुशृंखलवेष्टितांगा। गाढंबृहन्निगडकोटिनिघृष्टजंघाः। त्व
न्नाममंत्रमनिशं मनुजाः स्मरंतः। सद्यः स्वयंविगतबंधभया भवंति॥४२॥ मत्तद्विपेंद्रमृगराजदवानलाहि। संग्रामवा
रिधिमहोदरबंधनोत्थं। तस्याशुनाशमुपयाति भयं भियेव। यस्तावकंस्तवमिमंमतिमानधीते॥४३॥ स्तोत्रस्रजंत
व जिनेंद्र गुणैर्निबद्धां। भक्त्या मया रुचिरवर्णविचित्रपुष्पां॥ धत्ते जनो य इह कंठगतामजस्रं। तं मानतुंगमवशास
मुपैति लक्ष्मीः॥४४॥ इतिश्री भक्तामरस्तोत्रं समाप्तं उँ घं टा कर्णो महावीर। सर्वव्याधिविनाशक। विस्फोटक
भयं घोरं। रक्ष रक्ष महाबल॥१॥ यत्र त्वं तिष्ठसे देव लि खि तो क्षरपंक्तिभिः। रोगास्तत्र प्रणश्यंति। वातपित्तक
फोद्भवाः॥२॥ तत्र राजभयं नास्ति यांति कर्णे जपात्क्षयं॥ शा कि नी भूतवैताला। राक्षसाः प्रभवंति नः॥३॥ नाकालेम
रणंतस्य। न च सर्पेण दश्यते। अग्निचौरभयं नास्ति। ॐ ह्रीं श्री घंटाकरणो नमोस्तु ते स्वाहा॥४॥ इतिश्री घंटाकर
णस्तोत्रं समाप्तं॥ आचार्यश्री श्री श्री श्री श्री श्रीमदारंगजी तत्शिष्यमुनिजीवणेन लिखितं श्रीफ
तेपुरनगरे संवत् १७७१ वर्षे मिति आषाढ द्वितीय शुदि २ दिने बाईसूजी पठनार्थं शुभं कल्याणमस्तु श्री श्री

श्लो॰
२२